811245
BV
V.6.
40 97

17

THE

SIDDHANTA KAUMUDI

OF

BHATTOJI DIKSHITA,

EDITED AND TRANSLATED INTO ENGLISH

BY

SRISA CHANDRA VASU,

AND

VÂMAN DÂS VASU,

~~Vol. II., Part II.~~

Vol. 6

(VERBS.)

PUBLISHED BY

THE PANINI OFFICE, BHUVANESHVARI ASHRAM.

ALLAHABAD:

PRINTED AT THE UPPER INDIA PRESS, ALLAHABAD.

1907.

All rights reserved.

4097

FORE WORD.

This part contains the Kridanta affixes: or those affixes which are applied directly to roots in order to form substantives. In addition to the affixes given in Panini's Grammar, it contains some 800 sûtras relating to the Uṇâdi affixes. This portion is complete in itself and may be studied separately from the rest of the book.

1st January, 1907.

S. C. V.
B. D. V.

THE SIDDHÂNTA KAUMUDI.

VOLUME II.

PART II.

अथकृदन्तप्रकरणम्

THE KRIDANTA AFFIXES.

CHAPTER I.

२८२९ । धातोः । ३ । १ । ९१ ।

आ तृतीयसमाप्तेरधिकारोऽयम् । 'तत्रोपपदं सप्तमीस्थम्' (७८१) । 'कृदतिङ्' (३७४) ।

2829. **As far as the end of the Third Book reckoning from the present aphorism, the affixes treated of are to be understood as coming after some verbal root.**

This is an Adhikâra Sûtra. All these verbal affixes are broadly divided into two parts कृत् and कृत्य affixes. which will be described later on.

Here we must again repeat the two sûtras that follow it in the Ashtâdhyâyî, namely, III. 1. 92. S. 781 ; and III. 1. 93. S. 374,

२८२९ । क । तत्रोपपदं सप्तमीस्थम् ॥ ३ । १ । ९२ ॥

2829A. Here a word exhibited in the locative case is called an upapada or a dependant word.

२८२९ । ख । कृदतिङ् ॥ ३ । १ । ९३ ।

2829B. Any affix except tiṅ, is called kṛit.

२८३० । वा सरूपोऽस्त्रियाम् । ३ । १ । ९४ ।

परिभाषेयम् । अस्मिन्धात्वधिकारेऽसरूपोऽपवादप्रत्यय उत्सर्गस्य बाधको वा स्यात्स्त्र्यधिकारोक्तं विना ।

2830. **In this portion of the sûtras, in which there is a reference to verbal roots, an affix which is calculated to debar a general one, not being of the same form, optionally debars it ; but not so in the case of feminine affixes (III. 3. 94, &c.)**

Note.—Thus the affixes ण्वुल् and तृच् (III. 1. 133) are general affixes applicable to all roots in forming nouns of agency; and the sûtra III. 1. 133 which ordains these affixes, is an *utsarga* or a general rule; while the sûtra III. 1. 135 ordaining the affix क after verbs having a penultimate इक् vowel, and the roots ज्ञा, प्री and कॄ is an apavâda or a special aphorism. In the latter case, therefore, optionally we may have the affixes ण्वुल् and तृच् also. Thus क्षिप् is a root that has a penultimate इ belonging to the pratyâhâra इक्; and therefore, in forming the noun of agency from it, the affix क will have to be applied by rule 135 of this chapter already mentioned; thus विक्षिप् + क = विक्षिप् + अ = विक्षिपः; but this special rule, however, does not debar the operation of the general rule, and we have optionally विक्षिप + ण्वुल् = विक्षेपकः; and विक्षिप + तृ = विक्षेप्तृ nom. sing. विक्षेप्ता.

२८३१ । कृत्याः । ३ । १ । ९५ ।

अधिकारोऽयं ण्वुलः प्राक् ।

2831. From this aphorism, as far as the aphorism ण्वुलतृचौ (III. 1. 133), all the affixes treated, will get the name of Kṛitya.

This defines the class of affixes known as *kṛitya*, a subdivision of *kṛit* affixes. These are certain affixes like तव्य, अनीय, &c., which may be treated as declinable verbal terminations. (III. 4. 70). The word formed by them may be called Passive Potential Participles or Future Passive Participles.

२८३२ । कर्तरि कृत् । ३ । ४ । ६७

कृत्प्रत्ययः कर्तरि स्यादिति प्राप्ते ।

2832. The affixes called 'Kṛit' are used in the sense of agent.

The words formed by *kṛit* affixes have the sense of agency. When no other special sense has been assigned to them by any rule, then this rule will apply, and fix the force of the affix. This rule will not, therefore, apply to *kṛit* affixes like ख्युन् (III. 2. 5 and 6) to which a special sense has been assigned, but affixes like ण्वुल् and तृच् &c., (III. 1. 133). Thus कारकः means a 'doer'; कर्त्ता 'an agent; नन्दनः 'one who causes happiness'; ग्राही 'who seizes'; पचः 'who cooks.'

The following sûtra, however, makes an exception to this general sense of *kṛit* affixes.

२८३३ । तयोरेव कृत्यक्तखलर्थाः । ३ । ४ । ७० ।

एते भावकर्मणोरेव स्युः ।

2833. The affixes called 'kṛitya' and the affix 'kta' and those that have the sense of 'khal', have only these last two senses, namely, an action and an object, (bhâva and karma).

Note.—The word तयो 'of those two' refers to भाव 'an Impersonal act', and कर्म 'object'. The word एव 'only' is used in the sûtra to exclude the word 'agent' from it. Thus कर्तव्यः कटो भवता 'the mat must be made by you'; भोक्तव्यः ओदनो भवता 'the rice must be eaten by you'. Here the affix तव्य has the force of denoting the object; we may, therefore, call it the Potential Passive Participle affix. So also आसितव्यं भवता 'you must eat'; शयितव्यं भवता 'you must lie down'. Here the sense of the affix तव्य being that of the action itself, which being Impersonal, is in the singular number as it is one only, and neither male nor female, there is, from the nature of the case, a singular affix, and the neuter gender is employed.

Similarly the affix क्त denotes both the object and the action; कृतः कटो भवता 'the mat is made by you'; भुक्त ओदनो भवता 'the rice is eaten by you'. Here त is used with the force of denoting the object and may be called the past passive participle.

Similarly त may be used in denoting the mere act; आसितं भवता 'you sat'; शयितं भवता 'you lay down'.

Similarly the affixes having the sense of खल् (III. 3. 126) denote both the object and the Impersonal act. In the following examples the affixes denote the object; ईषत्करः कटो भवता 'this mat is made, by little at a time, by you'; सुकरः 'what is made with ease'; दुष्करः 'what is made with difficulty'. In the following examples the affixes denote the act; ईषदाढ्यंभवं भवता and स्वाढ्यंभवं भवता ।

After transitive verbs, the *kṛitya*, the *kta* and the *khalârtha* affixes only denote the object, but never denote the भाव or 'an Impersonal action'.

२८३४। तव्यत्तव्यानीयरः । ३ । १ । ९६ ।

धातोरेते प्रत्ययाः स्युः । तकाररेफौ स्वरार्थौ । एधितव्यम् । एधनीयं त्वया । भावे औत्सर्गिकमेकवचनं क्लीबत्वं च । चेतव्यश्चयनीयो वा धर्मस्त्वया । '* वसेस्तव्यत्कर्तरि णिच्च * '। वसतीति वास्तव्यः । '* केलिमर उपसंख्यानम् *'। पचेलिमा माषाः पक्तव्याः । भिदेलिमाः सरलाः भेत्तव्याः । कर्मणि प्रत्ययः । वृत्तिकारस्तु 'कर्मकर्तरि चायमिष्यते' इत्याह । तद्भाष्यविरुद्धम् ।

2834. The affixes तव्यत्, तव्य and अनीयर् come after verbal roots.

The phrase 'after verbal roots' is understood in this aphorism by anuvṛitti from sûtra 2829. The final letters त् of तव्यत् and र् of अनीयर् are for the sake of indicating accent, being merely diacritical letters. The letter त indicates svarita accent (VI. 1. 185) and the letter र indicates penultimate udâtta accent (VI. 1. 217); these being exceptions to the general rule of accent given in III. 1. 3.

Thus एध + तव्यत् = एधितव्यम्, and एध + तव्य = एधितव्यम् 'must be increased; एध + अनीयर् = एधनीयम् 'must be increased'. In these cases the sense being that of the Impersonal action itself or bhâva, there is neuter gender singular number.

When karma or object is denoted by these affixes, we have the example चेतव्यः or चयनीयो धर्मस्त्वया "The dharma must be acquired by thee." Here the affixes have a Passive designation.

Vart.—The affix तव्यत् when coming after the verb वस् 'to dwell' in marking the agent, is treated as if it had an indicatory ण्. The force of ण् is to cause vriddhi. Thus वस्+तव्यत्=वास्तव्यः 'a dweller'. Here the word is in the masculine gender, as the force of the affix is that of the agent, and not as it generally has that of an act or object (III. 4. 70).

Vart.—The affix केलिमर् should be enumerated in addition to those already enumerated in this aphorism. Thus पचेलिमा माषाः 'kidney beans fit to be cooked'; भिदेलिमा सरलाः 'the woods are apt to be split, *i.e.*, fragile'. This affix is to be employed when it is intended to express an object alone (*i.e.*, in the passive sense) and cannot be employed like those enumerated above, to denote also the action. The auther of Kâsikâ says that the affix is used in the Reflexive sense (karma-kartari). But this is opposed to the Bhâshya.

२८३५ । कृत्यचः । ८ । ४ । २९ ।

उपसर्गस्थान्निमित्तात्परस्या च उत्तरस्य कृत्स्थस्य नस्य णत्वं स्यात् । प्रयाणीयम् । 'अचः' किम् । प्रमग्नः । '*निर्विण्णस्योपसंख्यानम्*' । अचः परत्वाभावान्नकारेण व्यवधानाच्चाप्राप्ते वचनम् । परस्यणत्वम् । पूर्वस्य ष्टुत्वम् । निर्विण्णः ।

2835. **The न् of a Krit affix, preceded by a vowel, is changed into ण, when it follows an alterant upasarga.**

The following are the specific Krit affixes in which this change takes place:—अन (यु), मान (शानच् &c. VII. 2. 82), अनीय,(III. 1. 96) अनि,(III. 3. 111) इनि (णिनि III. 2. 78, &c.) and the substitutes of निष्ठा (VIII. 2. 42).

Thus

अनः प्रयाणम्, परिमाणम् प्रमाणम् परियाणम् ॥ मानः प्रयायमाणम्, परियायमाणम् ॥
अनीय प्रयाणीयम्, परियाणीयम् ॥ अनि अप्रयाणि, अपरियाणि ॥
इनि प्रयायिन्, प्रयायणौ, परियायिन्, परियायिणौ
निष्ठादेशः प्रहीणः, परिहीणः, प्रहीणवान् परिहीणवान् ॥ Long ई by VI. 4. 66.

Why do we say अचः 'preceded by a vowel?' Observe प्रमग्नः, the Nishthâ of मस्ज ॥ It is thus formed: मस्+क्त=मस्+त=मस्+न (VII. 2. 45, the root मस् is read as टु स मस्जो शुद्धौ in the dhâtupâtha, having an indicatory ओ thus giving scope to the rule). मस्+न=मग्+न (The न substitution being considered asiddha, the स of masj is elided by VIII. 2. 29. and then there is gutturalisation by VIII. 2. 30)=मग्नः ॥

Vart.—The word निर्विण्णः should be enumerated in this place. As निर्विण्णोस्मि खलसङ्गेन ॥ निर्विण्णोऽहमत्रवासेन ॥ Here the न does not come after a vowel but after द् of विद् and so the rule would not have applied to it. This vârtika

makes the rule applicable to this न also. Thus निर्विद् + त = निर्विद् + न (VIII. 2. 42. S. 3016) = निर्विड् + ण = निर्विण्णः ॥ The द is changed also to ण ॥

२८३६ । णेर्विभाषा । ८ । ४ । ३० ।

उपसर्गस्थान्निमित्तात्परस्य ण्यन्ताद्विहितो यः कृत्स्थस्य नस्य णो वा स्यात् । प्रयापणीयम् प्रयापनीयम् । 'विहितविशेषणम्' किम् । यका व्यवधाने यथा स्यात् । प्रयाप्यमाणं पश्य । णत्वे 'दुर उपसर्गत्वं न' इत्युक्तम् । दुर्यापनम् । दुर्यापनम् ।

2836. The न् of a Krit-affix ordained after a causative verb (ण्यन्त), is optionally changed to ण् when it comes after an alterant upasarga.

Thus प्रयापणम् or प्रयापनम्, परियापणम् or परियापनम् प्रयाप्यमाणम् or प्रयाप्यमानम्, प्रयापणीम् or प्रयापनीयं, अप्रयापणिः or अप्रयापनिः, प्रयापिणौ or प्रयापिनौ ॥

Why have we used the word विहितं 'ordained' in explaining the sûtra? Because the change takes place, even where the कृत् affix does not follow directly after the affix णि but where a third affix such as यक् intervenes. As प्रयाप्यमाणम् पश्य ॥ The णेः being in the ablative, under the ordinary rule of interpretation (I. 1. 72), the krit-affix should come immediately after णि. For the purposes of causing the change of न to ण, the word दुर् is not considered to be an upasarga. This has already been taught before, (see vârtika under VIII 4, 16. S 2231). Thus दुर्यापनम् or दुर्यापनम् ॥

२८३७ । हलश्चेजुपधात् । ८ । ४ । ३१ ।

हलादेरिजुपधात्कृन्नस्याचः परस्य णो वा स्यात् । प्रकोपणीयम्–प्रकोपनीयम् । 'हलः' किम् । मोहणीयम् । 'इजुपधात्' किम् प्रवपणीयम् ।

2837 A krit-affix, coming after a verb, which begins with a consonant and has a penultimate इच् vowel, changes optionally its न् which is preceded by a vowel, into ण्, when it comes after an alterant upasarga.

The phrase कृत्यचः is understood here. Thus प्रकोपणीयम् or प्रकोपनीयम्, परिकोपणम् or परिकोपनम् ॥

Why do we say हलः 'beginning with a consonant'? Observe प्रहणीयम, and मोहणीयम, where the change is obligatory, under VIII. 4. 29. These are from ईह चेष्टायाम and ऊह वितर्के ॥

Why do we say, इजुपधात् 'having a penultimate इच् vowel'? Observe प्रवणीयम and परिवपणम; no option.

Note.—The word हलः in the sûtra should be interpreted as हलादेः, and not as ordinarily "after what ends in हल" ॥ For an इजुपधा verb implies that it ends with a consonant, and so the employment of the word हलः in the text would have been useless had it meant हलन्तात ॥

२८३८ । इजादेः सनुमः । ८ । ४ । ३२ ।

सनुमश्चेद्भवति तर्हि इजादेर्हलन्ताद्विहितो यः कृत्तस्यस्यैव । प्रेङ्खणीयम् । 'इजादेः' किम् । 'मगि सर्पणे' । प्रमङ्गनीयम् । नुम्ग्रहणमनुस्वारोपलक्षणम् । 'अट कुप्वाङ्–'(१९७) इति सूत्रेऽप्येवम् । तेनेह न । प्रेन्वनम् । इह तु स्यादेव । प्रोम्भणम् ।

2838. A kṛit-affix ordained after a verb beginning with an इच् vowel, having the augment नुम् in it, and ending with a consonant, changes its न into ण when preceded by an alterant upasarga.

The word हलः of the last sûtra is understood here. But contrary to the construction put upon it in the last sûtra, here it means हलन्तात्, by the natural rule of construction as given in I. 1. 72. We must interpret it so here, because it is impossible for an इजादि root to commence with a हल्; while to have done so in the last aphorism would have been redundant.

Thus प्रेङ्खणीयम्, परेङ्खणम् from इखि गत्यर्थः the नुम् is added because it is इदित् ॥ The rule will not apply to प्रेन्वनम् but it will apply to प्रोम्भणम् from उम्भ पूरणे where म् or the nasal is part of the root. The नुम् here means the anusvâra generally as also in sûtra (VIII. 4. 2). Therefore though the change would have been vaild by the general rule, (VIII. 4. 29) this sûtra makes a नियम or restriction. That is, only in the case of इजादि सनुम् verbs the change takes place, not in other सनुम् verbs. Thus प्रमङ्गनम्, परिमङ्गनम् from the root मगि सर्पणे ॥

Note.—This rule does not affect rule VIII. 4. 30, relating to णयन्त verbs, for those verbs cannot be said to end with a consonant Moreover, we have used the word विहितः in explaining the sûtra, in order to indicate this fact, that the kṛit-affix must be *ordained* after a consonant-ending verb. In the case of causative verbs, the kṛit-affix is *ordained* after a vowel-ending (णि) verb, and the vowel is elided *after* the adding of the affix. So that *before* the adding of the affix, the verb did not end in a consonant.

२८३९ । वा निंसनिक्षनिन्दाम् । ८ । ४ । ३३ ।

एषां नस्य णो वा स्यात्कृति परे । प्रणिंसितव्यम्–प्रनिंसितव्यम् ।

2839. The न of निंस 'to kiss' निक्ष् 'to be angry' and निन्द 'to blame' is changed to ण optionally, when preceded by an upasarga having in it a cause of change.

Thus प्रणिंसितव्यम् or प्रनिंसितव्यम्, प्रणिक्षणम् or प्रनिक्षणम्, प्रणिन्दनम् or प्रनिन्दनम् ॥

Note.—These verbs are written with ण in the Dhâtupâṭha, and therefore by rule VIII. 4. 14 ante, the change of न into ण would have been obligatory. The present sûtra makes it optional. The root णिसि means 'to kiss', णिक्षि रोषणे, and णिदि कुत्सायाम् ॥

२८४० । न भाभूपूकमिगमिप्यायिवेपाम् । ८ । ४ । ३४ ।

एभ्यः कृन्नस्य णो न । प्रभानीयम् । प्रभवनीयम् । 'पूञ एवेह ग्रहणमिष्यते' । पूङ्स्तु प्रपवणीयः सोमः । '* ण्यन्तभादीनामुपसंख्यानम् *' । प्रभापनीयम् । 'कशाञः शस्य यो वा' इत्युक्तं णत्वप्रकरणोपरि तद्बोध्यम् । यत्वस्यासिद्धत्वेन शकारव्यवधानान्न णत्वम् प्रख्यानीयम् ।

2840. The न of a kṛit-affix is not changed to ण, though preceded by an upasarga having in it a cause of change, when the affix is added to the following verbs: भा 'to shine', भू 'to be', पू 'to purify', कमि 'to be brilliant', गमि 'to go', प्यायि 'to increase', वेप 'to shake'

This rule is an exception to VIII. 4. 29. Thus :—

भा, प्रभानीयम् परिभानम् । भू, प्रभवनीयम् परिभवनम् । पू, प्रपवनम्, परिपवनम् ॥

Ishti.—The verb पूञ् is to be taken and not the verb पूङ् ॥ In the case of the latter the change is obligatory, as, प्रपवणीयः सोमः ॥

कमि प्रकमनम्, परिकमनम् ॥ गमि प्रगमनम्, परिगमनम् ॥
प्यायि प्रप्यायनम्, परिप्यायनम् ॥ वेप् प्रवेपनम्, परिवेपनम् ॥

Vârt.—The above roots, even when in the Causative, do not change the न of their kṛit-affix. As प्रभापनीयम्, परिभापनम् ॥ There is no change in प्रख्यानीयम् also. It is derived from the root चक्शाञ् with the prefix प्र ॥ The श is replaced by य by a vârtika in the Mahâbhâshya under II. 4. 54 : and the position of this vârtika is taught there also, namely, that it should be read in the subdivision of asiddhas (VIII 2. 1) just at the close of the ण change rules. Therefore य being considered asiddha, the न is not changed to ण because a श intervenes or rather is still considered to intervene between the र of प्र and न ॥ Had the root been ख्याञ् no rule would have prevented the change of न to ण in प्रख्यानीयम् and the form would be प्रख्याणीयम् See II. 4. 54. S. 2436.

When the श् is changed to ष् in नश् the न of नश् is not changed. Thus प्रनष्टः, परिनष्टः ॥ The नुम् ordained by VII. 1. 60, is elided by VI. 4. 24, and श् changed to ष् by VIII. 2. 36.

Why do we say षान्तस्य ? Observe प्रणश्यति, परिणश्यति ॥ The word अन्त is taken in order that the prohibition may apply to words like प्रनङ्क्ष्यति, which did end with ष् though the ष has been changed by other rules, and is no longer visible. For here the श् of नश् is changed to ष् by VIII. 2. 36, and then this ष् is changed to क् by VIII. 2. 41; and the नुम् is added by VII. 1. 60.

२८४१ । कृत्यल्युटो बहुलम् । ३ । ३ । ११३ ।

स्नान्त्यनेन स्नानीयं चूर्णम् । दीयतेऽस्मै दानीयो विप्रः ।

2841. The affixes called 'kṛitya' (III. 1. 95) and the affix 'lyuṭ', are diversely applicable.

By saying 'diversely' we mean that they occur in other places than those where ordained by the rules. Thus *kṛitya* affixes are ordained to come when an 'act' or an 'object' is to be expressed, but they come also when the *kâraka* is other than the objective. Thus स्नानीयं चूर्णम् 'powder for bathing'; दानीयोब्राह्मणः 'a Brâhmaṇa to whom a donation is to be made'. In the first of these examples the 'powder' is the 'instrument' expressible by the 3rd case, and in the second the 'Brâhmaṇa' is the recipient expressible by the fourth case; so that in both cases the affix is applied without any express rule.

Similarly, ल्युट् is ordained to come in denoting instrument, location, and a verbal noun (III. 3. 115 and 117). But it is applied in other senses also. Thus राजभोजनाः शालयः 'halls for eating of kings'; राजाच्छादनानि वासांसि 'dresses to be worn by the 'king'.

By using the word 'diversely', even the *kṛit* affixes are applied in places other than those expressly ordained. Thus पादाभ्यास् ह्रियते = पादहारकः । गलेचोप्यते = गलेचोपकः । For accent see VI. 2. 150.

To the root वद् with the upapada नञ् (the negative Particle अ) would have been added the two affixes यत् and क्यप् under sûtra III. 1. 106. S 2854. This sûtra ordains यत् only: and that also, when the sense is that of censure. The irregular form अवद्य therefore is for both these purposes.

Thus अवद्यं पापं 'a trifling sin'. Why do we say "when condemnable"? Observe अनुद्यं गुरुनाम 'the name of the teacher is not to be uttered'. The name of the teacher is neither condemnable nor incapable of utterance. But it is not polite for the pupil to utter the name of the teacher. As says the verse of the Smṛiti:—

"Let the person desirous of prosperity not take his own name, or his teacher's name, or the name of a great miser, or of an elder son or wife."

२८४२ । अचो यत् । ३ । १ । ९७ ।

अजन्ताद्धातोर्यत्स्यात् । चेयम् । जेयम् । अच्ग्रहणं शक्यमकर्तुम् । योगविभागोऽप्येवम् । तव्यदादिष्वेव यतोऽपि सुपठत्वात् ।

2842. The affix यत् comes after a root that ends in a vowel.

The letter त् of this affix is indicatory showing that the udâtta accent falls on the first vowel (VI 1. 213); thus गा + यत् = गेय noun sing, गेयम् 'what is to be sung'; so also पेयम् 'what is to be drunk'; जेयम् 'what is to be conquered'. The आ of गा and पा is changed into ए by VI. 4. 65.

Note.—Why do we say 'that ends in a vowel'? By III. 1. 124, a root ending in a consonant takes ण्यत् affix instead of यत्; reading these two aphorisms together, the conclusion to be drawn is that the affix यत् comes

after roots which *primarily* end in a vowel, though in the course of development they may end in a consonant by the application of other rules. Thus from दो 'to cut', we have the desiderative root दित्स, which ends in a vowel अ. This अ is elided before ârdhadhâtuka affixes and thus the root becomes दित्स्, which ends in a consonant; nevertheless we shall have the affix यत् and not ण्यत्. Thus दित्स्यम् 'what is wished to be cut'; धित्स्यम् 'what is wished to be placed'. Similarly लु before ârdhadhâtuka affixes becomes लो, the ओ is changed into अव् before य (VI. 1. 79) and the form then is लव्. The root लव् however takes यत् and not ण्यत्: as लव्यो पव्यम्, &c.

We could have well spared the word अचः in this sûtra. For all roots either end in a vowel or a consonant. Now III. 1. 124 specifically ordains ण्यत् after all roots ending in a consonant. Therefore यत् would find its scope only after those roots which end in a vowel.

For similar reasons, moreover there was no necessity of making this a separate sûtra, It could well have been included in the preceding Ashtâdhyâyî sûtra III. 1. 96. That is instead of तव्यत् तव्यानीयरः we could have well enunciated it as तव्यत्तव्यानीयर्यतः meaning "the affixes tavyat, tavya, anîyar and yat come after verbal roots." The scope of yat would be restricted to vowel ending roots by the subsequent sûtra III. 1. 124.

२८४३ । ईद्यति । ६ । ४ । ६५ ।

यति परे आत ईत्स्यात् । गुणः । देयम् । ग्लेयम् । '* तकिशसिचतियतिजनिभ्यो यद्वाच्यः* तक्यम् । शस्यम् । चत्यम् । यत्यम् । जन्यम् । जनेर्यद्विधिः स्वरार्थः । ण्यतापि रूपसिद्धेः । न च वृद्धिप्रसङ्गः । 'जनिवध्योश्च' (२५१२) इति निषेधात् । '* हनो वा यद्वधश्च वक्तव्यः *' । वध्यः । पक्षे वक्ष्यमाणो ण्यत् । घात्यः ।

2843. The final आ of a stem is changed into ई before the Kṛit-affix यत् ॥

Thus देयम्, ग्लेयम्. The Guṇa takes place according to VII. 3. 84.

Vart.—The verbs तक् 'to laugh at' शस् 'to kill' चत् 'to ask' यत् 'to attempt' and जन् 'to be born', should be enumerated in addition; that is to say, these verbs, though ending in a consonant, take यत् and not ण्यत्; as तक्यम्, शस्यम्, चत्यम्, यत्यम्, and जन्यम्. The root जन् would have assumed the form जन्य even by the affix ण्यत्; the present vârtika ordains यत् for the sake of the accent. The ण्यत् would not have caused vṛiddhi of the अ of जन्; for vṛiddhi is specifically prohibited with regard to जन् by VII. 3. 35. The accent of यत् is regulated by VI. 1. 213, and of ण्यत् by VI. 1. 185.

Vart.—And of the verb हन् 'to kill' वध is the substitute when it optionally takes the affix यत्. Thus we have वध्यम् or घात्यम्. The latter form is evolved by sûtras VII. 3. 32 and 54. The affix यत् comes only after the वध् substitute; after हन् the affix ण्यत् comes which changes the ह into घ, and न into त and causes vṛiddhi.

२८४४। पोरदुपधात्। ३। १। ९८।

पवर्गान्तादहुपधाद्यत्स्यात्। ण्यतोऽपवादः। शप्यम्। लभ्यम्। '× नानुबन्धकृतमसारूप्यम् ×'। अतो न ण्यत्। तव्यदादयस्तु स्युरेव।

2844. The affix यत् comes after a root, which ends in a labial letter preceded by a short अ.

This debars ण्यत्; thus शप्+यत्=शँप्यं 'to be sworn'; लभ्+यत्=लँभ्यम् 'to be acquired'.

Note.—Why do we say 'which ends in a labial'? Because if a root ends in any other consonant, though preceded by a short अ the root will take ण्यत्; thus पच्+ण्यत्=पाक्यम् 'what is to be cooked'; वाक्यम् 'speech'.

Why do we say 'when preceded by a short अ'? When preceded by any other vowel, it will take ण्यत्; thus कुप्+ण्यत्=कोप्यम् 'to be angry'; so also गोप्यम् 'to be concealed'.

The word अत् is used in the sûtra in the original. The force of त् here is, by I. 1. 70, that short अ having one mâtrâ or prosodial length is to be taken and not long आ. Therefore, after the root आप् 'to obtain', we have ण्यत् and not यत्; thus आप्यम् 'to be reached' *i.e.* 'attainable'.

In the sûtra III. 1. 94, s. 2830, we have used the word असरूप। But it must be understood that the indicatory letters do not make two affixes asarûpa, whose efficient parts are identical. Therefore यत् and ण्यत् are sarûpa affixes; and one will debar the other. And so there will be no ण्यत् added to these roots. But the affixes तव्यत्, &c., are not debarred; and they will certainly come after these roots.

Note.—Why do we say 'not being of the same form'? Because if two affixes have the same form, the present rule will not apply; and in the case of such affixes, the special affix will debar the general affix. Thus the affixes अण् and क are, when stripped of their indicatory letters, affixes having the same form *i.e.* अ; and therefore the sûtra III. 2. 1. ordaining अण् as a generel rule, will be always debarred by sûtra III. 2. 3. oradaining क, as the latter is a special sûtra applicable only to those roots which end in long आ, or which are simple roots not compounded with any preposition. Thus गो+दा+क=गोदः 'giver of cows'. So also कम्बलदः 'blanket-giver'. In these cases we cannot have the affix अण्.

It follows from this sûtra as a necessary corollary, that the addition of indicatory letters does not make two or more affixes dissimilar in form (असरूप) when their essential effective element is the same. Thus the affixes क, अण्, अच्, अ &c. are similar.

Why do we say 'but not so in the case of feminine affixes'? Because in the case of feminine affixes, a special affix will debar a general affix, though they may be dissimilar in form. Thus sûtra III. 3. 94. ordaining क्तिन् in forming feminine nouns from roots is a general or *utsarga* rule,

while sûtra III. 3. 102. ordaining अ after roots that have already taken some affix is a special or *apavdda* rule, and though अ and क्ति are dissimilar in form, they being feminine affixes, the former will always debar the latter. Thus the compound desiderative roots चिकीर्ष and जिहीर्ष will form feminine nouns in आ and not by क्तिन्. Thus चिकीर्षा and जिहीर्षा and not चिकीर्षति, &c.

२८४५ । आङो यि । ७ । १ । ६५ ।

आङः परस्य लभेर्नुम्स्याद्यादौ प्रत्यये विवक्षिते । नुमि कृतेऽदुपधत्वाभावाद् यदेव । आलम्भ्या गौः ।

2845. The augment नुम् is added to लभ् preceded by आ, before an affix beginning with य ॥

As आलम्भ्या गैा: ॥ The नुम् is added before the addition of the affix, and by so doing लभ् becomes लम्भ् and thus loses its character of having a penultimate अ, and therefore by III. 1. 124, we shall have ण्यत् affix, and not यत् affix by III. 1. 98.

Note.—Had the नुम् been added *after* the addition of the affix, then यत् would be added by III. 1. 98. Though in both cases the form will be आलम्भ्य; the difference will be in the accent: यत् would throw the acute on the first syllable (यतोऽनावः); while, as a matter of fact, the word has svarita on the final; thus instead of आलँम्भ्य (VI. 1. 213. and by VI. 2. 139), which यत् gives, we have आलम्भ्यं (तित् svar).

Note.—Why do we say 'when preceded by आ'? Observe लभ्य ॥ How do you explain अग्निष्टोम आलभ्यः? All rules are optionally applied in the Vedas. Or आलभ्य may be explained by saying that the नुम् having been added, is again dropped.

२८४६ । उपात्प्रशंसायाम् । ७ । १ । ६६ ।

उपलम्भ्यः साधुः । 'स्तुतौ' किम् । उपलब्धुं शक्य उपलभ्यः ।

2846. The augment नुम् is added to लभ् preceded by उप, before य, when the reference is to something praiseworthy.

As उपलम्भ्यः साधुः ॥ (These words are formed by ण्यत् and have svarita on the final.) Why do we say 'when referring to something praiseworthy'? Observe उपलभ्यः this is formed with the यत् affix (III. 1. 98), and means "capable of being perceived."

२८४७ । शकिसहोश्च । ३ । १ । ९९ ।

शक्यम् । सह्यम् ।

2847. The affix यत् comes after the roots शक् 'to be able', and सह 'to bear'.

Thus शँक्यम् 'possible' सँह्यम् 'endurable',

२८४८ । गदमदचरयमश्चानुपसर्गे । ३ । १ । १०० ।

गद्यम् । मद्यम् । चर्यम् । '* चरेराङि चागुरौ * ' । आचर्यो देशः । गन्तव्य इत्यर्थः । 'अगुरौ' किम् । आचार्यो गुरुः । यमेर्नियमार्थम् । सोपसर्गान्मा भूदिति । प्रयाम्यम् । निपूर्वात्स्यादेव । तेन ' तत्र न भवेद्विनियम्यम्' इति वार्तिकप्रयोगात् । एतेन 'अनियम्यस्य नायुक्तिः' । 'त्वयानियम्या ननु दिव्यचक्षुषा' इत्यादि व्याख्यातम् । नियमे साधुरिति वा ।

2848. The affix यत् comes after the roots गद् 'to speak', मद 'to be mad', चर 'to go, to eat', and ' यम to restrain', when these roots do not take any preposition.

Thus गद्यम् 'what is to be spoken, *i.e.*, prose'; मद्यम् 'wine'; चर्यम् 'what is to be followed; यम्यम् 'what is to be restrained'.

Why do we say 'when not preceded by a preposition'? When compounded with an upasarga, these roots will take ण्यत्; thus प्रगाद्यम्;प्रमाद्यम् &c.

The root यम् would have taken the affix यत् by III. 1. 98 also, as it ends in म् and is preceded by अ; its separate enumeration in this sûtra is in order to show, that the compound verb यम् will not take the affix यत् . Therefore with regard to यम्, this is a *niyama* or restrictive rule and not a *vidhi* or original rule. Thus प्रयाम्यम् । Exception, however, must be made in the case of the preposition नि । There the affix यत् is added and not ण्यत् ; as we find the form विनियम्यम् used in a vârtika. For this reason the form अनियम्य is not without authority. As in the sentence त्वया नियम्या ननु दिव्यचक्षुषा॥

Or these forms can be explained not as kritya words formed by यत् added to the root यम्; but as Taddhita words formed by यत् added to the noun नियम (IV. 4. 98).

Vart.—The root चर when preceded by the preposition आङ् takes the यत् affix when the sense is not that of a preceptor'; thus आचर्यो देशः 'an approachable or communicable country'. But when the sense is that of 'a teacher' the root takes ण्यत् ; thus आचार्यः 'a preceptor'.

२८४९ । अवद्यपण्यवर्या गर्ह्यपणितव्यानिरोधेषु । ३ । १ । १०१ ।

वदेर्नञ्युपपदे 'वदः सुपि–' (२८५४) इति यत्क्यपोः प्राप्तयोर्यदेव सोऽपि गर्ह्यायामेवेत्युभयार्थं निपातनम् । अवद्यं पापम् । 'गर्ह्ये' किम् । अनुद्यं गुरुनाम । तद्धि न गर्ह्यं वचनानर्हं च ।

'आत्मनाम गुरोर्नाम नामातिकृपणस्य च ।
श्रेयस्कामो न गृह्णीयाज्ज्येष्ठापत्यकलत्रयोः ॥'

इति स्मृतेः । पण्या गौः । व्यवहर्तव्येत्यर्थः । पाण्यमन्यत् । स्तुत्यर्हमित्यर्थः । अनिरोधोऽप्रतिबन्धस्तस्मिन्विषये वृङो यत् । शतेन वर्या कन्या । वृत्यान्या ।

2849. The words अवद्य (VI. 2. 160) पण्य and वर्या are irregularly formed, having the sense of 'condemnable', 'saleable' and 'not restricted' respectively.

Thus, अवद्यं पापं 'a censurable or trifling sin'. Another and regular form is अनुद्यम् This is formed by adding the affix क्यप् to the root वद् by III. 1. 106. As अनुद्यं गुरुनाम "the name of an elder should not be uttered."

Here there is no sense of condemnation, but it lays down a precept of good conduct according to the above verse of the smṛiti which declares "a person desirous of prosperity should not utter the names of himself or of his Guru or of a very miserly person, or of the eldest son or of a wife." So also पण्यः कम्बलः 'saleable blanket'; पण्या गौः 'saleable cow. The other and regular form is पाण्यम्, formed by the addition of ण्यत् and meaning 'praiseworthy'. So also शतेन वर्या 'courted by hundreds'; सहस्रेण वर्या wooed by thousands, *i.e.*, there is no restriction as to the number of candidates for the purposes of selection of a husband by a maid: in other words वर्या = wooed, courted. Courted by hundreds, &c. The other and regular form is वृत्या from the root वृ 'to choose'. वर्या means a girl choosing her own husband and is not reserved or shy. The word वर्या in the sûtra is in the feminine gender, and it is in this gender only that the word is so formed. In the masculine gender, the word is regularly formed; thus वार्या ऋत्विजः.

२८५० । वह्यं करणम् । ३ । १ । १०२ ।

वहन्त्यनेनेति वह्यं शकटम् । 'करणम्' किम् । वाह्यम्–वोढव्यम् ।

2850. The word वह्यं is irregularly formed, in the sense of "wherewith something is carried".

The word वह्यं is derived from the root वह 'to carry' and means 'a vehicle' *i. e.*, that by which a thing is carried; as वह्यं शकटम्. When it does not mean a carriage, the root takes the affix ण्यत्; thus वाह्यः 'an ox'.

२८५१ । अर्यः स्वामिवैश्ययोः । ३ । १ । १०३ ।

'ऋ गतौ' अस्माद्यत् । ण्यतोऽपवादः । अर्यः स्वामी वैश्यो वा । 'अनयोः' किम् । आर्यो ब्राह्मणः प्राप्तव्य इत्यर्थः ।

2851. The word अर्य (and अर्य) is irregularly formed when meaning 'lord' and a 'Vaisya'.

The root ऋ 'to go', would have taken ण्यत् by III. 1. 124; but it takes यत् when the sense of the word formed by it is that of a 'lord or sir', or a man of the 'Vaisya' caste. As अर्य स्वामी, 'honored sir' अर्यो वैश्यः Arya or Vaisya.'

Note.—Though by VI. 1. 213, the affix यत् makes the udátta accent fall on the first syllable of the word, yet in the case of the word अर्य, when it means 'lord', the accent falls on the last syllable.

Why do we say 'when it means sir or a Vaisya? Otherwise the root takes the affix ण्यत् as आर्यो ब्राह्मणः 'the respectable Brâhmana," *i.e.*, one worthy to be approached or reachable.

२८५२ । उपसर्या काल्या प्रजने । ३ । १ । १०४ ।

गर्भग्रहणे प्राप्तकाला चेदित्यर्थः । उपसर्या गौः । गर्भाधानार्थं वृषभेणोपगन्तुं योग्येत्यर्थः । 'प्रजने काल्या' इति किम् । उपसार्या काशी । प्राप्तव्येत्यर्थः ।

2852. The word उपसर्या is irregularly formed in the sense of "ripe for cover, or ripe for fruition."

The word उपसर्या is formed by adding यत् affix to the root सृ 'to move', compounded with the preposition उप. The word काल्या means having reached the time. The word प्रजन means the first conception. Thus उपसर्या गौः 'the cow fit for cover'; उपसर्या वडवा 'the mare fit for the horse'.

Why do we say 'when meaning what has reached the time favorable to conception'? Otherwise the affix ण्यत् will be used; as उपसार्या काशी 'Kâshî is approachable'.

२८५३ । अजर्यम् संगतम् । ३ । १ । १०५ ।

नञ्पूर्वाज्जीर्यतेः कर्तरि यत्संगतं चेद्विशेष्यम् । न जीर्यतीत्यजर्यम् । 'तेन संगतमार्येण रामाजर्यं कुरु द्रुतम्' इति भट्टिः । 'मृगैरजर्यं जरसोपदिष्टमदेहबन्धाय पुनर्बबन्ध' इत्यत्र तु संगतमिति विशेष्यमध्याहार्यम् । 'संगतम्' किम् । अजरिता कम्बलः। भावे तु संगतकर्तृकेऽपि ण्यदेव। अजार्यं संगतेन ।

2853.—The word अजर्यम् (VI. 2. 160) 'imperishable' is irregularly formed when qualifying the word सङ्गतम् 'friendship' expressed or understood.

The word अजर्यम् is formed from the root जॄ by the addition of यत् with the force of the agent and affixing the negative particle अ; as अ+जॄ+यत् =अजर्यम् the force is not that of bhâva (III. 4. 70).

Thus अजर्यं नोऽस्तु सङ्गतम् 'let our friendship be imperishable'. So also अजर्यमार्यसङ्गतम्. So also Bhatti, "तेन सङ्गतमार्येण रामाजर्यं कुरु द्रुतम्"—O Rama! quickly make imperishable friendship with that honored one. " The word अजर्यं is an adjective qualifying the word 'friendship' expressed or understood. It does not mean friendship: for two synonyms can not be used in the same sentence: and अजर्यं सङ्गतं of Bhatti would have been wrong. Nor is ajaryam used in the sense of friendship in the sentence मृगैरजर्यं जरसोपदिष्टम् for here the word sangatam is understood, and ajaryam qualifies it.

Why do we say when qualifying the word सङ्गतम्? Observe अजरिता कम्बलः 'undecaying blanket' when the force is that of bhâva, the affix would be ṇyat, though the agent be sangata. As अजार्यं सङ्गतेन "Imperishable through friendship."

२८५४ । वदः सुपि क्यप् च । ३ । १ । १०६ ।

उत्तरसूत्रादिह भाव इत्यपकृष्यते । वदेर्भावे क्यप्स्याच्चाद्यदनुपसर्गे सुप्युपपदे । ब्रह्मोद्यम् ब्रह्मवद्यम् । ब्रह्म वेदः तस्य वदनमित्यर्थः । कर्मणि प्रत्ययावित्येके । उपसर्गे तु ण्यदेव । अनुवाद्यम् । अपवाद्यम् ।

2854. After the root वद् 'to speak', governing a case-inflected word as its upapada, and not having a preposition annexed to it, there comes the affix क्यप् as well as यत् to denote condition.

The word भावे is to be drawn into this sûtra from the next.

The phrase 'not having a preposition' is to be read into this sûtra by *anuvritti* from III. 1. 100 S. 2848. The force of the word 'also' is to indicate that the affix यत् is also employed. The word सुपि means 'in construction with an upapada that ends in a case-affix',

Thus ब्रह्म + वद् + क्यप् = ब्रह्म + वद् + य = ब्रह्मोद्यम्; ब्रह्म + वद् + यत् = ब्रह्मवद्यम् 'told by the Vedas or Brahman'. Similarly सत्योद्यम् or सत्यवद्यम् 'truth-mouthed'.

Some say these two affixes come with a Passive significance: and not that of bhâva only.

Why do we say 'when it has a case-inflected word as upapada'? Otherwise वद् + ण्यत् = वाद्यम् a 'musical instrument'.

Why do we say 'not having a preposition'? Observe प्रवाद्यम् 'a rumour' formed by the affix ण्यत् and not by यत् or क्यप्.

२८५५ । भुवो भावे । ३ । १ । १०७ ।

क्यप्स्यात् । ब्रह्मणो भावो ब्रह्मभूयम् । सुपीत्येव । भव्यम् । अनुपसर्ग इत्येव । प्रभव्यम् ।

2855.—After the root भू 'to be', in construction with a case-inflected word as its upapada and when used without a preposition, the affix क्यप् is employed to denote condition (bhâva).

The words सुपि and अनुपसर्गे of previous sûtras are understood in this The *anuvritti* of यत् does not cover this aphorism. As ब्रह्मभूयं गतः = ब्रह्मत्वं गतः 'gone to or arrived at Brahmahood; देवभूयं = देवत्वं गतः 'gone to divinity'.

The word *bhâva* of this sûtra governs the succeeding ones.

Why do we say 'in construction with a case-inflected word'? Otherwise it will take यत्; as भू + यत् = भो + यत् = भव्यम् (VI. 1. 79).

Why do we say 'not taking a preposition'? Observe प्रभव्यम्.

२८५६ । हनस्त च । ३ । १ । १०८ ।

अनुपसर्गे सुप्युपपदे हन्तेर्भावे, क्यप्स्यात्तकारश्चान्तादेशः । ब्रह्मणो हननं ब्रह्महत्या । स्त्रीत्वं लोकात् ।

2856. After the root हन् 'to kill', when in construction with a case-inflected word as its upapada, and when used without a preposition, comes the affix क्यप् in denoting condition, and the letter त is the subsitute of its final न ॥

The phrases सुपि अनुपसर्गे and भावे are understood in this sûtra.

As ब्रह्म + हन् + क्यप् = ब्रह्म + हत् + य = ब्रह्महत्य, (VI. 1. 71) ब्रह्महत्या 'Brâhmaṇa murder'. The word is feminine because of usage.

Note.—When not in construction with a noun, the form is घातः 'a blow' (हन् + णिच् + घञ्). This verb does not take the affix ण्यत् in denoting condition, there being no example of such formation.

Why do we say 'when not taking a preposition'? Observe प्रघातो वर्त्तते 'there is a combat'.

२८५७ । एतिस्तुशास्वृदृजुषः क्यप् । ३ । १ । १०९ ।

एभ्यः क्यप्स्यात् ।

2857. After the verbs इ 'to go', स्तु 'to praise', शास् 'to govern', वृ 'to choose', दृ 'to respect' and जुष् 'to please', comes the affix क्यप्.

The anuvritti of सुपि, अनुपसर्गे and भावे does not extend to this aphorism. The present sûtra ordains generally the affix क्यप् after the above verbs.

२८५८ । ह्रस्वस्य पिति कृति तुक् । ६ । १ । ७१ ।

इत्यः । स्तुत्यः । 'शास इदङ्हलोः' (२४८६) । शिष्यः । 'वृ' इति वृञो ग्रहणं न वृङः । वृत्यः । वृङस्तु वार्या ऋत्विजः । आदृत्यः । जुष्यः । पुनः क्यब्ग्रहणं परस्यापि ण्यतो बाधनार्थम् । अवश्य स्तुत्यः । 'शंसिदुहिगुहिभ्यो वा' इति काशिका । शस्यम् । शंस्यम् । दुह्यम् । दोह्यम् । गुह्यम् । गोह्यम् । 'प्रशस्यस्य श्रः' (२००९) । ईडवन्दवृशंसदुहां ण्यतः' (३७०२) इमि सूत्रद्वयबलाच्छंसेः सिद्धम् । इतरयोस्तु मूलं मृग्यम् । '*आङ्पूर्वादञ्जेः संज्ञायामुपसंख्यानम्*' 'अञ्जू' व्यक्तिम्रक्षणादिषु । बाहुलकात्करणे क्यप् । 'अनिदिताम्–' (४१५) इति नलोपः । आज्यम् ।

2858. To a root ending in a short vowel is added the augment त (तुक्) when a Krit-affix having an indicatory प follows.

Note.—Thus अग्नि + चि + क्विप् = अग्निचित् so also सोमसुत् ॥ Similarly प्रकृत्य and प्रहृत्य and उपस्तुत्य formed by the affix ल्यप् ॥ Why do we say "ending in a short vowel"? Observe आलूय, ग्रामणीः ॥ Why do we say "having an indicatory प्"? Observe कृतम्, हृतम् ॥ Why do we say "a krit-affix"? Observe पटुतरः, पटुतमः, with the Taddhita-affixes तरप् and तमप् ॥ In the compound ग्रामणिकुलम्, though the root is made short, yet there is no augment तुक्, in as much as the rule by which the root has been shortened is a Bahiranga rule, and the present rule is an Antaranga one. The maxim is असिद्धं बहिरङ्गमन्तरङ्गे ॥ "That which is Bahiranga is regarded as not having taken effect, or as not existing, when that which is Antaranga is to take effect".

Thus इ + क्यप् = इ + त् + य = इत्यः 'to be gone'. So also स्तु + क्यप् = स्तुत्यः 'to be praised'; शास् + क्यप् = शिस् + य (आ being changed into इ by VI. 4. 34. S. 2486) = शिष्यः 'to be instructed, *i. e.*, a pupil'. So also वृ + क्यप् = वृत्य 'to be chosen. By वृ in the sûtra the root वृ ञ् is intended to be taken, and not the root वृङ्. The equivalent derivative of the latter is वार्यः as वार्या ऋत्विजः । आदृ + क्यप् आदृत्यः 'to be honoured'; जुष् + क्यप् = जुष्यः 'to be served.'

Though the anuvritti of क्यप् was current from the previous sûtra 2854, its repetition in this aphorism is to indicate that other rules such as III. 1. 125, ordaining ṇyat should not take effect in the above verbs. Thus III. 1. 125. s. 2886. requires ण्यत् after the verb स्तु, but the present rule prohibits that. Thus we have अवश्यस्तुत्यः 'must be praised.'

According to Kâsikâ, the roots शस् 'to praise' दुह् 'to milk' and गुह् 'to cover' optionally take the affix क्यप्. As शस्यम् or शंस्यम् (VI. 4. 37); दुह्यम् or दोह्यम्, गुह्यम् or गोह्यम्. Of the above three forms s'asya may be explained by its being used by Pâṇini in the sûtra V. 3. 60. as formed by ṇyat of VI. 1. 214. But the authority for the other two is doubtful.

Vart.—The verb अज (रुध् 21) 'to anoint', preceded by the preposition आङ् takes the affix क्यप् when used as an appellative. As आ+अञ्+क्यप् =आज्यम् meaning clarified butter. The nasal is elided by VI. 4. 24. S. 415. The affix has the force of instrument as a diversity.

२८५९ । ऋदुपधाच्चाक्लृपिचृतेः । ३ । १ । ११० ।

'वृत्' । वृत्यम् । 'वृध्' । वृध्यम् । क्लृपिचृत्योस्तु । कल्प्यम् । चर्त्यम् । 'तपरकरणम्' किम् । 'कृत्' । कीर्त्यम् । अनित्यण्यन्ताश्चुरादय इति णिजभावे ण्यत् । णिजन्तात्तु यदेव ।

2859. After verbs having a penultimate short ऋ, the affix क्यप् is employed, with the exception of the verbs क्लृप् 'to be able', and चृत् 'to hurt'.

Thus वृत + क्यप् = वृत्यम्; so also वृध्यम्. But क्लृप् and चृत् will form कल्प्यम्, and चर्त्यम्.

Why have we used the letter त् in ऋत्? It is to indicate that short ऋ is meant and not long ॠ (I. 1. 70). Therefore the root कृत् will take ण्यत् and form कीर्त्यम्. It has already been taught that णिच् added to चुरादि roots is not of universal application. Therefore when णिच् is not added we have the affix ṇyat. But when the root ends in ṇich then the yat is the proper affix.

२८६० । ई च खनः । ३ । १ । १११ ।

चात्क्यप् । आद्गुणः । खेयम् । 'इ च' इति ह्रस्वः सुपठः ।

2860. The affix क्यप् is employed after the root खन् 'to dig,' and long ई is substituted for the final of the root.

By the force of च we draw in क्यप्.

Thus खन्+ क्यप्=ख+ई+य=खेयम् 'to be dug' (VI. 1. 87). The long ई is used in the sûtra for the sake of euphony. The same purpose would have been served by using short इ, thus 'इ च खनः'. But the long ई indicates that the rule VI. 4. 43 does not apply here. By that rule the अ of खन् would have been lengthened into आ before the affix क्यप्.

२८६१ । भृञोऽसंज्ञायाम् । ३ । १ । ११२ ।

भृत्याः कर्मकरा भर्तव्या इत्यर्थः । क्रियाशब्दोऽयं न तु संज्ञा । '* समश्च बहुलम् *' । संभृत्याः। संभार्याः । असंज्ञायामेव विकल्पार्थमिदं वार्तिकम् । 'असंज्ञायाम्' किम् । भार्या नाम क्षत्रियाः । अथ कथं भार्या वधूरिति । इह हि 'संज्ञायांसमज–' (३२७६) इति क्यपा भाव्यम् । संज्ञापर्युदासस्तु पुंसि चरितार्थः । सत्यम् । बिभर्तेर्भृ इति दीर्घान्तात्त्वृयादेर्वा ण्यत् । क्यप्तु भरतेरेव । '× तदनुबन्धकग्रहणे–× ' इति परिभाषया ।

2861. The affix क्यप् is employed after the verb भृञ् 'to bear' when not used as a name.

Thus भृ+क्यप्=भृत्य Pl. भृत्याः 'those who ought to be supported,' *i.e.*, 'servants'. The word is here a verbal noun and not an appellative. Why do we say 'when not used as an appellative'? Observe भृ+ण्यत्=भार्यः 'a Kshatriya'. How do you then explain भार्या meaning 'wife'. For by the

sûtra III. 3. 99. S. 3276 the feminine ought to have been भृत्या with क्यप् and not भार्या with ṇyat; for the exception असंज्ञायाम् finds its full scope in the masculine? True: the objection is apparently valid. भार्या is not from भृञ् भरणे (Bhuâdi 946) but from either भृ of the Juhotyâdi 5, or from भृ ending in long ऋ of the Kryâdi class No. 21. The भृञ् of the present sûtra must be confined to the Bhuâdi root, and not to the भृञ् of the Juhotyâdi, for the latter has an indicatory डु and is read as डुभृञ् in the Dhâtupâtha. Because the maxim 'an expression with an indicatory letter does not include one with it' applies.

Vart.—The use of *kyap* is optional when this verb takes the preposition सम्. Thus संभृत्याः or संभार्याः This vârtika allows an option only when the word is not an appellative.

२८६२ । मृजेर्विभाषा । ३ । १ । ११३ ।

मृजेः क्यब्वा स्यात् । पक्षे ण्यत् । मृज्यः ।

2862. The affix क्यप् optionally comes along with ṇyat after the root मृज् 'to cleanse'.

This is an example of *Prâpta-vibhâshâ*. By III. 1. 110 *ante*, the root मृज् having a penultimate ऋ would have necessarily taken *kyap*; this sûtra declares an option. As परिमृज्यः or परिमार्ग्यः 'to be cleansed'. The second form is thus evolved:—

परिमृज्+ण्यत् (III. 1. 124). Now applies the following sûtra by which j is changed to g.

२८६३ । चजोः कु घिण्ण्यतोः । ७ । ३ । ५२ ।

चस्य जस्य च कुत्वं स्याद्घिति ण्यति च प्रत्यये परे । '* निष्ठायामनिट इति वक्तव्यम् *' । तेनेह न । गर्ज्यम् । 'मृजेर्वृद्धिः' (२४७३) । मार्ग्यः ।

2863. For the final च् or ज् of a root, there is substituted a corresponding guttural, before an affix having an indicatory घ and before ण्यत् ।

Thus we have परिमृग्+ण्यत् । Then there is vṛiddhi of the ṛi of mṛig by VII. 2. 114 : so we get परिमार्ग्यः ॥

Note.—The यथासंख्य rule does not apply here. The sûtra does not mean that the च is gutturalised before a घित् and ज before a ण्यित् affix; but both.

This guttural change takes place in the case of nyaṅku, &c., also by the following.

२८६४ । न्यङ्क्वादीनां च । ७ । ३ । ५३ ।

कुत्वं स्यात् । न्यङ्कुः । 'नावञ्चेः—' इत्युप्रत्ययः ।

2864. The gutural is substituted in nyanku and the rest. Thus नि+अञ्च्+उ=न्यङ्कुः 'a kind of black antelope.'

२८६५ । राजसूयसूर्यमृषोद्यरुच्यकुप्यकृष्टपच्याव्यथ्याः । ३ । १ । ११४ ।

एते सप्त क्यबन्ता निपात्यन्ते । राजा सोतव्योऽभिषवद्वारा निष्पादयितव्यः । यद्वा । लतात्मकः सोमो राजा स सूयते कण्ड्यतेऽत्रेत्यधिकरणे क्यब्निपातनाद्दीर्घः । राजसूयः—राजसूयम् । अर्धर्चादिः । सरत्याकाशे सूर्यः । कर्तरि क्यब्निपातनादुत्वम् । यद्वा 'षू प्रेरणे' तुदादिः । सुवति कर्मणि लोकं प्रेरयति क्यपो रुट् । मृषोपपदाद्वदेः कर्मणि नित्यं क्यप् । मृषोद्यम् । विशेष्यनिघ्नोऽयम् । 'उच्छ्रायसौन्दर्यगुणा मृषोद्याः' । रोचते रुच्यः । गुपेरादेः कुत्वं च संज्ञायाम् । सुवर्णरजतभिन्नं धनं कुप्यम् । गोप्यमन्यत् । कृष्टे स्वयमेव पच्यन्ते कृष्टपच्याः कर्मकर्तरि । शुद्धे तु कर्मणि कृष्टपाक्याः । न व्यथतेऽव्यथ्यः ।

2865. The words राजसूय, सूर्य, मृषोद्य, रुच्य, कृष्ट, पच्य, and अव्यथ्य are irregularly formed by the addition of the affix क्यप्.

Thus राजा सोतव्यः or राजा इह सूयते, राज + सू + क्यप् = राजसूयः 'the Râjasûya or coronation sacrifice. The soma creeper is also called râjâ. The ceremony in which soma is extracted is also called râjasûya. The lengthening is by nipâtana.

Similarly सृ or सृ + क्यप् = सूर्यः 'the sun', literally that which moves (सरति) in the sky; or that which impels (सुवति) creation to action. When sûrya is derived from sṛi + kyap; then ṛi is replaced by short उ which becomes lengthened by VIII. 2. 77. When it is derived from the Tudâdi root षू प्रेरणे, then the augment रुट् is added to kyap. मृष + वद + क्यप् = मृषोद्यम् 'false speech'; this is an exception to III. 1. 106, by which यत् would also have been applied. This rule prevents it. In mṛishodya the affix kyap is added to √vad preceded by the upapada mṛishâ, the force of the affix being to denote an object, and it is nitya. The word follows the gender, &c., of the substantive which it qualifies, *i.e.*, it is dependant on its substantive (viseshya). Thus उच्छ्रायसौन्दर्यगुणा मृषोद्याः. So also रोचते असौ, रुच् + क्यप् = रुच्य. 'an agreeable lover'. So also गुप् + क्यप् = कुप्यम् 'a base metal (other than gold and silver)'; the other form is गोप्यम् । कृष्ट + पच् = कृष्टपच्याः 'that which ripens of itself in cultivated ground,' This is when the force of the affix is that of a reflexive. But when it denotes an object (Passive) only, the form is कृष्टपाक्याः । न व्यथते = अव्यथ्यः 'a snake (what does not move by legs)'.

२८६६ । भिद्योद्ध्यौ नदे । ३ । १ । ११५ ।

भिदेरुज्झेश्च क्यप् । उज्झेर्धत्वं च । भिनत्ति कूलं भिद्यः । उज्झत्युदकमुद्ध्यः । 'नदे' किम् । भेत्ता । उज्झिता ।

2866. The words भिद्य and उद्ध्य are irregularly formed by the affix क्यप् when meaning a 'river'.

Thus भिद् + क्यप् = भिद्यः 'a river that breaks its banks by the rush of its water', the name of the Bhidya river.

उज्झ् + क्यप् = उद्ध्य 'a river whose waters overflow the banks', name of the Uddhya river; the झ is changed into ध. Why do we say "when mean-

ing a river"? When not meaning or qualifying the river, the regular forms are used; thus भेत्ता and उज्झिता.

२८६७ । पुष्यसिध्यौ नक्षत्रे । ३ । १ । ११६ ।

अधिकरणे क्यबिपात्यते । पुष्यन्त्यस्मिन्नर्थाः पुष्यः । सिध्यन्त्यस्मिन्सिध्यः ।

2867. The words पुष्य and सिद्ध्य are irregularly formed by the affix क्यप्, when used as names of asterisms.

Thus पुष्+क्यप्=पुष्यः 'the Pushya asterism'. It is so called because objects are nourished under the influences of this asterism. सिध्+क्यप्=सिद्ध्यः 'the asterism Siddhya' another name of Pushya, so-called because things are accomplished under the influence of this star. The force of the affix is that of 'location'.

Note.—When not the name of asterisms, the forms are पोषणं 'nourishing,' सेधनं 'accomplishing'.

२८६८ । विपूयविनीयजित्या मुञ्जकल्कहलिषु । ३ । १ । ११७ ।

पूङ्नीभ्जिभ्यः क्यप् । विपूयो मुञ्जः । रज्ज्वादिकरणाय शोधयितव्य इत्यर्थः । विनीयः कल्कः । पिष्ट औषधिविशेष इत्यर्थः । पापमिति वा । जित्यो हलिः । बलेन कृष्टव्य इत्यर्थः । कृष्टसमीकरणार्थं स्थूलकाष्ठम् । अन्यत्तु विपव्यम् । विनेयम् । जेयम् ।

2868. The words विपूय, विनीय and जित्य are irregularly formed when they mean, the 'munja grass', the 'sediment' and the 'plough' respectively.

Thus वि+पू+क्यप्=विपूयः etymologically 'that which has *to be purified* to make rope'; वि+नी+क्यप्=विनीय 'a sediment or sin'; जि+क्यप्=जित्य 'a plough that which is *to be conquered* by strength'.

The regular derivatives are, विपव्यम्, विनेयम् and जेयम्.

२८६९ । प्रत्यपिभ्यां ग्रहे । ३ । १ । ११८ ।

"* छन्दसीति वक्तव्यम्*" । प्रतिगृह्यम् । अपिगृह्यम् । लोके तु प्रतिग्राह्यम् । अपिग्राह्यम् ।

2869. The verb ग्रह 'to seize', preceded by the prepositions प्रति and अपि, takes the affix क्यप् (in the Vedic literature.)

